अस्याम् प्रश्नपत्रपुस्तिकायाम् 41 प्रश्नाः एवम् 08 मुद्रित पृष्ठाः सन्ति।

| Roll No. अनुक्रमाङ्कः | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|

Code No. 71/SS/309
कोड नं.

SET/सेट- A

# SANSKRIT

# संस्कृतम्

## (309)

Day and Date of Examination

(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of Invigilators : 1. ____________________

(निरीक्षकयोः हस्ताक्षरम्)

2. ____________________

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**सामान्य अनुदेशाः -**

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनमं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 71/SS/309/A, सेट - A अवश्यमेव लेखनीया।



UNNATI EDUCATIONS
9899436384: 9654-279-279

# SANSKRIT
# संस्कृतम्
## (309)

**परीक्षासमयावधि: (Time) : होरात्रयम् (3 Hours)** **[पूर्णाङ्का: (Full marks) : 100**

**निर्देशा:**
(i) अस्मिन् प्रश्नपत्रे आहत्य 41 प्रश्ना: सन्ति।
(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्का: × प्रश्ना: = पूर्णाङ्का:) इति एवम् अङ्कान् निर्दिशति।
(iii) समे प्रश्ना: अनिवार्या:।
(iv) प्रश्नपत्रेऽस्मिन् चत्वार: भागा: सन्ति।

**NOTE / निर्देश :**

(1) Answers of all questions are to be given in the Answer-Book given to you.
सभी प्रश्नों के उत्तर आपको दी गई उत्तर पुस्तिका में ही लिखें।

(2) 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 02.15 p.m. From 02.15 p.m. to 02.30 p.m., the students will read the question paper only and will not write any answer on the answer-book during this period.
इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण दोपहर में 02.15 बजे किया जाएगा।दोपहर 02.15 बजे से 02.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

### भाग - A

पञ्चदशप्रश्नानां युक्तं विकल्पं चिनुत। **1x15=15**

**1.** विक्रमस्य राज्ये कीदृशः जनः नासीत् ? **1**
(क) महान् (ख) विद्वान् (ग) तस्करः (घ) सुखी

**2.** कः राज्ञः दर्शनाभिलाषी द्वारे तिष्ठति ? **1**
(क) श्वेताम्बरः (ख) सज्जनः (ग) समृद्धः (घ) जीर्णवस्त्रधारी

**3.** दामोदरः कं जघान ? **1**
(क) सिंहम् (ख) गजेन्द्रम् (ग) मृगेन्द्रम् (घ) व्याघ्रम्

**4.** भूमौ पवनावधूतं किं फलं पतति ? **1**
(क) दाडिमफलम् (ख) नारिकेलफलम् (ग) कदलीफलम् (घ) आम्रफलम्



UNNATI EDUCATIONS
9899436384: 9654-279-279

5. समुद्रसमं सरः किम् ? 1

(क) ब्रह्म (ख) ज्योतिः (ग) द्यौः (घ) इन्द्रः

6. दिवाकरात् अन्धकारं कः रक्षति ? 1

(क) महादेवः (ख) सूर्यः (ग) हिमालयः (घ) मेघः

7. पौरिकः नृपः कीदृशः आसीत् ? 1

(क) पुरुषाधमः (ख) पुरुषोत्तमः (ग) पुरुषोचितः (घ) पुरुषर्षभः

8. कल्पानाचावलायाः जन्मभूमिः का ? 1

(क) राजस्थानराज्यम् (ख) गुजरातराज्यम् (ग) पंजाबराज्यम् (घ) हरियाणाराज्यम्

9. 'मा द्रुमेभ्यो महाभागः, दीनेभ्यो दोग्धुमर्हथ' इति कुत्र उक्तमस्ति ? 1

(क) महाभारते (ख) भागवतपुराणे (ग) मार्कण्डेयपुराणे (घ) रामायणे

UNNATI
EDUCATIONS
EK KADAM UNNATI KI AUR

10. सुश्रुतः कस्य पुत्रः आसीत् ? 1

(क) अत्रेः (ख) वसिष्ठस्य (ग) वाल्मीकेः (घ) विश्वामित्रस्य

11. स्वर्णभाण्डं दिवा केन रक्षितव्यम् ? 1

(क) विदूषकेण (ख) मैत्रेयेण (ग) शार्विलकेन (घ) वर्धमानेन

12. पञ्चानां यक्षाणां कस्य राज्ये प्राणधारणं दुष्करं जातम् ? 1

(क) चारुदत्तस्य (ख) दुष्यन्तस्य (ग) पौरिकस्य (घ) मैत्रबलस्य

13. 'सत्सु' इति कीदृशं रूपम् ? 1

(क) द्वितीयैकवचनान्तम् (ख) षष्ठ्येकवचनान्तम्

(ग) षष्ठी-बहुवचनान्तम् (घ) सप्तमी-बहुवचनान्तम्



UNNATI EDUCATIONS
9899436384: 9654-279-279

14. किम्-शब्दस्य पुँल्लिङ्गे द्वतीया-बहुवचने किं रूपम् ? **1**

(क) कस्मात् (ख) केन (ग) कान् (घ) केभ्यः

15. 'इदम्' इति कस्मिन् अर्थे प्रयुज्यते ? **1**

(क) समीपतरार्थे (ख) विप्रकृष्टार्थे (ग) परोक्षे (घ) सन्निकृष्टार्थे

16. उचितविकल्पान् मेलयत। **1x4=4**

| | **क - स्तम्भः** | | **ख - स्तम्भः** |
|---|---|---|---|
| (क) | प्रणष्टकुला : | (1) | अल्प + ईयसुन् |
| (ख) | प्रियविहीना : | (2) | अन्तिक + ईयसुन् |
| (ग) | नेदीयान् | (3) | तृतीया-तत्पुरुष : |
| (घ) | कनीयान् | (4) | बहुव्रीहि : |

UNNATI
EDUCATIONS
EK KADAM UNNATI KI AUR

17. अधोलिखितेषु सत्यम् असत्यं वा चिनुत । **1x4=4**

(क) हिमालयः दिवाकरात् न रक्षति।

(ख) पौरिकः मृत्वा गोमायुत्वं सम्प्राप्तः।

(ग) अस्माकं देशात् कोऽपि अन्तरिक्षं न गतवान्।

(घ) नभोमण्डलं पर्यावरणस्य पञ्चमं स्थानम्।

18. सन्धिं विच्छेदं वा कुरुत। **1x4=4**

(क) सर्वोपकरण + उपेताम् =

(ख) शापितः + असि =

(ग) ............ + उत्सुकाः = अरण्यदर्शनोत्सुकाः

(घ) पूर्वजः + ........... = पूर्वजोऽस्य

19. अधोरेखांकितं पदम् अनुसृत्य प्रश्ननिर्माणं कुरुत। **1x4=4**

(क) <u>पृथिव्याः</u> मानदण्ड इव स्थितः । (ख) पुरा <u>श्रीमत्यां</u> पौरिको नृपः आसीत।

(ग) आकाशे <u>ग्रहनक्षत्राणि</u> सन्ति (घ) पशूनां हननं दण्डार्हम् आसीत्।



UNNATI EDUCATIONS
9899436384: 9654-279-279

**20.** अधोलिखितेषु प्रकृतिप्रत्ययविभाजनं कुरुत । **1x5=5**

(क) .......... + .......... + .......... = संसिक्तानि

(ख) लिख् + अनीयर् =

(ग) प्र + नम् + ल्यप् =

(घ) प्र + आप् + क्तवतु =

(ङ) .......... + .......... = हर्तुम्

**21.** उदाहरणानुसारम् अधोलिखितानां शब्दानां विभक्तिं वचनं च अनुसृत्य शब्दरूपाणि लिखत । **1x5=5**

| | **शब्द:** | **विभक्ति:** | **वचनम्** | **रूपम्** |
|---|---|---|---|---|
| **उदाहरण** | लता | चतुर्थी | एकवचनम् | लतायै |
| **1.** | राजन् | द्वितीया | बहुवचनम् | |
| **2.** | प्रतिहारिन् | षष्ठी | बहुवचनम् | |
| **3.** | ज्योतिष् | प्रथमा | द्विवचनम् | |
| **4.** | पितृ | चतुर्थी | एकवचनम् | |
| **5.** | मनस् | तृतीया | बहुवचनम् | |

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

## भाग – B

**यथानिर्देशम् उत्तराणि लिखत ।** **2x2=4**

**22.** (क) 'पतन्ति परपीडका:' इति नाट्यांश: कस्मात् ग्रन्थात् उद्धृत: ? तस्य च रचयिता क: ? **2**

**अथवा**

(ख) 'कष्टं न्यासस्य रक्षणम्' इति नाट्यांश: कस्मात् ग्रन्थात् उद्धृत: ? तस्य च रचयिता क: ?

**23.** 'हृदयपरिवर्त्तनम्' इति नाटके राज्ञ: किं नाम ? तस्य च राज्ये कति यक्षा: आगतवन्त: ? **2**

## भाग – C

**पञ्च अनतिदीर्घोत्तरै: समाधत्त।** **4x5=20**

**24.** (क) 'परार्थे आत्मोत्सर्ग:' इति पाठमाश्रित्य विक्रमस्य चरितं वर्णयत।

**अथवा**

(ख) 'कष्टं न्यासस्य रक्षणम' इति नाटकम् आश्रित्य विदूषकस्य चरितं वर्णयत ।

**25.** 'कष्टं न्यासस्य रक्षणम्' इति नाटकम् आश्रित्य स्वर्णभाण्डस्य वृत्तान्तं वर्णयत।

**26.** 'पर्यावरणस्य संरक्षणम्' इति पाठस्य सारं लिखत।



UNNATI EDUCATIONS
9899436384: 9654-279-279

27. 'वर्षर्तुवर्णनम्' इति गद्यांशम् आश्रित्य वर्षर्तो: समासेन वर्णनं कुरुत।

28. पर्यावरणस्य वायुमण्डलं तेजोमण्डलं निर्वर्ण्य तयो: दूषणनिरोधाय संरक्षणाय च उपायद्वयं वर्णयत।

## भाग – D

**चत्वार: दीर्घोत्तरै: समाधेया।** 5x4=20

29. अधोलिखितविषयमधिकृत्य मञ्जूषासाहाय्येन दशसु वाक्येषु एकम् अनुच्छेदं लिखत।

विषय: - ऋतुराज: वसन्त:

**मञ्जूषा –** षड् ऋतव:, ऋतुराज:, वृक्षा:, पुष्पाणि, भ्रमरा:, लता:, सौरभप्रसार:, जलाशया:, कमलानि, नवीनानि पत्राणि, कोकिला:, आम्रमञ्जर्य:, आकाश:, निर्मल:, भवति।

**अथवा**

विषय: - अस्माकं विद्यालय:

मञ्जूषा – शिक्षका:, प्रकोष्ठा:, श्यामपट्टम्, लेखनकार्यम्, प्रश्ना:, पुस्तकानि, क्रीडाक्षेत्रे, छात्रा:, कक्षायां, प्रधानाचार्य:, पुस्तकालय:, बहूनि, परीक्षा, लेखनी, शोभनम्, विद्यन्ते।

30. मित्रेण सह मोहन: 'देहलीभ्रमणम्' इति विषयम् आश्रित्य वार्तालापं करोति। तयो: संवादं दशसु वाक्येषु वर्णयत।

**अथवा**

रमा दीक्षया सह 'आगामिनी परीक्षा' इति विषयम् आश्रित्य वार्तालापं करोति। तयो: संवादं दशसु वाक्येषु वर्णयत।

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

31. भवान् देवदत्त: स्वमित्रं यज्ञदत्तं द्वादशीकक्षायां साफल्यार्थं मंगलकामनायुक्तं पत्रं लिखतु।

32. 'ग्रामे रामलीला – मञ्चनम्' इति विषयं समाश्रित्य परियोजनाम् एकाम् लिखत।

**अथवा**

'विद्यालये स्वतंत्रता-दिवस:' इति विषयं समाश्रित्य परियोजनाम् एकाम् लिखत।

## वैकल्पिक: भाग: - क

**अधोलिखितेषु युक्तियुक्तं विकल्पं चिनुत।**

33. 'भाति मे भारतम्' अस्ति – 1

(क) यात्राकाव्यम् (ख) नाटकम् (ग) गीतिकाव्यम् (घ) शतककाव्यम्

34. तेनालीरामकथा अनूदिता – 1

(क) वनेश्वर: पाठक: (ख) संस्कृत अकादमी (ग) ओमप्रकाश: ठाकुर: (घ) सत्यप्रकाशसिंह:



UNNATI EDUCATIONS
9899436384: 9654-279-279

**35.** सूर्यस्य निकटतम: ग्रह: क: ? **1**

(क) पृथिवी (ख) शुक्र (ग) मंगल: (घ) बुध:

**36.** 'गणितसारसंग्रह:' केन विरचित: ? **1**

(क) श्रीपतिना (ख) भाष्कराचार्येण (ग) महावीराचार्येण (घ) श्रीधरेण

**37.** 'कुजग्रह:' इति कस्य ग्रहस्य नाम ? **1**

(क) बुधग्रहस्य. (ख) शनिग्रहस्य (ग) मंगलग्रहस्य (घ) वरुणग्रहस्य

**38.** अधोलिखितेषु युग्मानां मेलनं कुरुत। **4**

| | **काव्यम्** | | **लेखक:** |
|---|---|---|---|
| (क) | द्वा सुपर्णा | (1) | पण्डिता क्षमाराव: |
| (ख) | गुहावासी | (2) | श्रीधरभाष्करवर्णेकर: |
| (ग) | ग्रामज्योति: | (3) | डॉ. रामजी उपाध्याय: |
| (घ) | विवेकानन्दविजयम् | (4) | सत्यप्रकाश - सिंह |

**प्रश्नत्रयं समाधेयम्** **2x3=6**

**39.** दूतकाव्यं किं भवति ? द्वयो: दूतकाव्ययो: नामनी लिखत।

**अथवा**

पत्रकाव्यस्य सोदाहरणं विवरणं लिखत।

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**40.** 'विमानशास्त्रम' इति विषये सोदाहरणं विवरणं लिखत।

**41.** 'आयुर्वेदस्य प्रवर्त्तक: क: ? कति च तस्य परम्परा: ?।

**अथवा**

अष्टाङ्गहृदयस्य संक्षिप्तं विवरणं लिखत ।

**वैकल्पिक: भाग: - ख**

**अधोलिखितेषु युक्तियुक्तं विकल्पं चिनुत।**

**33.** सांसारिक: व्यवहार: कां विना सम्यक् न प्रचलति ? **1**

(क) धनम् (ख) साहित्यम् (ग) भाषा (घ) वेदम्



UNNATI EDUCATIONS
9899436384: 9654-279-279

34. वैदिकशब्दकोष: अस्ति – 1

(क) निरुक्तम् (ख) निघण्टु: (ग) वाचस्पत्यम् (घ) अमरकोश:

35. दूरदर्शने प्रस्तुतं सर्वप्रथमं संस्कृत-नाटकं किम् ? 1

(क) भगवदज्जुकीयम् (ख) सोमप्रभविवाह:

(ग) भाति मे भारतम् (घ) आदिशङ्कराचार्य

36. ब्रह्मगुप्त: कस्य नियमान् निर्मितवान् ? 1

(क) शून्यप्रयोगस्य (ख) चिकित्साया: (ग) शिक्षाया: (घ) कल्पस्य

37. ई.पू. 200 वर्षे शून्यसिद्धान्तस्य मान्यता केन कृता ? 1

(क) पतञ्जलिना (ख) आर्यभटेन. (ग) पाणिनिना (घ) पिङ्गलेन

38. अधोलिखितेषु युग्मानां मेलनं कुरुत। 4

| | **ग्रन्था:** | | **तद्वैशिष्ट्यम्** |
|---|---|---|---|
| (क) | भावप्रकाश: | (1) | वैदिकशब्दकोश: |
| (ख) | ऋग्वेद: | (2) | लौकिकशब्दकोश: |
| (ग) | अमरकोश: | (3) | प्राचीनतम: ग्रन्थ: |
| (घ) | निघण्टु: | (4) | चिकित्साग्रन्थ: |

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**प्रश्नत्रयं समाधेयम् ।** 2x3=6

39. द्वयो: वैद्युदान्विकमाध्यमानां नामनी लिखत, यत्र संस्कृतभाषाया: उपयोग: भवति ।

**अथवा**

आकाशवणीत: संस्कृतभाषायां प्रसारितयो: द्वयो: कार्यक्रमयो: नामनी लिखत।

40. प्रशासनिकविज्ञप्तय: किं भवन्ति ? इति विषये संक्षेपेण लिखत।

41. व्यंग्यचित्रस्य भाषा कीदृशी भवती ? इति संक्षेपेण लिखत।

**अथवा**

निमंत्रणपत्रस्य अभिनन्दनपत्रस्य वा भाषा कीदृशी भवति ? इति संक्षेपेण लिखत।

- o O o -



UNNATI EDUCATIONS
9899436384: 9654-279-279